श्री दुर्गा कवचं (ब्रह्मांडमोहनं)

श्री दुर्गा कवचं (ब्रह्मांडमोहनं)

नारायण उवाच |
ॐ दुर्गेति चतुर्थ्यंतः स्वाहांतो मे शिरोऽवतु |
मंत्रः षडक्षरोऽयं च भक्तानां कल्पपादपः || 1 ||

विचारो नास्ति वेदेषु ग्रहणेऽस्य मनोर्मुने |
मंत्रग्रहणमात्रेण विष्णुतुल्यो भवेन्नरः || 2 ||

मम वक्त्रं सदा पातु ॐ दुर्गायै नमोऽंततः |
ॐ दुर्गे रक्षयति च कंठं पातु सदा मम || 3 ||

ॐ ह्रीं श्रीमिति मंत्रोऽयं स्कंधं पातु निरंतरं |
ह्रीं श्रीं क्लीमिति पृष्ठं च पातु मे सर्वतः सदा || 4 ||

ह्रीं मे वक्षःस्थलं पातु हस्तं श्रीमिति संततं |
श्रीं ह्रीं क्लीं पातु सर्वांगं स्वप्ने जागरणे तथा || 5 ||

प्राच्यां मां प्रकृतिः पातुः पातु वह्नौ च चंडिका |
दक्षिणे भद्रकाली च नैर्ऋत्यां च महेश्वरी || 6 ||

वारुण्यां पातु वाराही वायव्यां सर्वमंगला |
उत्तरे वैष्णवी पातु तथैशान्यां शिवप्रिया || 7 ||

जले स्थले चांतरिक्षे पातु मां जगदंबिका |
इति ते कथितं वत्स कवचं च सुदुर्लभं || 8 ||

यस्मै कस्मै न दातव्यं प्रवक्तव्यं न कस्यचित् |
गुरुमभ्यर्च्य विधिवद्वस्त्रालंकारचंदनैः |
कवचं धारयेद्यस्तु सोऽपि विष्णुर्न संशयः || 9 ||

इति श्रीब्रह्मवैवर्ते महापुराणे प्रकृतिखंडे नारदनारायणसंवादे दुर्गोपाख्याने सप्तषष्टितमोऽध्याये ब्रह्मांडमोहनं नाम श्री दुर्गा कवचं |